परीवादः, पुं, (परि+वद्+भावे घञ्। "उपसर्गस्य घञीति।" ६।३।१२२। इति दीर्घः।) दोषोल्लासः। तत्पर्य्यायः। कुत्सा २ निन्दा ३ जुगुप्सा ४ गर्हा ५ गर्हणम् ६ निन्दनम् ७ कुत्सनम् ८ परिवादः ९ जुगुप्सनम् १० आक्षेपः ११ अवर्णः १२ निर्वादः १३ अपक्रोशः १४ भर्त्सनम् १५ उपक्रोशः १६ अपवादः १७ अववादः १८। इति शब्दरत्नावली ॥ (यथा,
"परीवादस्तथ्यो भवति वितथो वापि महतां
तथाप्युच्चैर्धाम्नां हरति महिमानं जनरवः।
तुलोत्तीर्णस्यापि प्रकटितहताशेषतमसो
रवेस्तादृक्तेजो नहि भवति कन्यां गतवतः ॥")
वीणादिवादनम्। येन काष्ठविशेषादिना वीणादिर्वाद्यते सः। इति जटाधरः।

परीवारः, पुं, (परिव्रियतेऽनेनेति। परि+वृ+घञ्। उपसर्गस्य दीर्घः।) खड्गकोषः। जङ्गमः। (यथा, रघुः। १५। १६।
"धूमधूम्रो वसागन्धी ज्वालाबभ्रुशिरोरुहः।
क्रव्याद्गणपरीवारश्चिताग्निरिव जङ्गमः ॥")
परिच्छदः। इत्यमरः। ३। ३। १९८ ॥ परीवारः परिजने खड्गकोषे परिच्छदे। इत्यनेकत्र दर्शनात्। जङ्गमो जङ्गमविशेषः परिजन इत्यर्थः। खड्गकोषोऽसिवायकः मेयान् इति ख्यातः। परिच्छदः शोभाजनकमुपकरणं छत्रचामरादिः सभ्यजनादिश्च एषु परीवारः। इति तट्टीकायां भरतः ॥

परीवाहः, पुं, (परितो वहत्यनेनेति। परि+वह+"हलश्च।" ३। ३। १२१। इति घञ्। "उपसर्गस्य घञीति।" ६। ३। १२२। इति दीर्घः।) जलोच्छ्वासः। इत्यमरः। १।१०।१० ॥ (अत्र जलशब्द उपलक्षणमात्रं ज्ञेयम्। द्रवद्रव्यस्य प्रवाहेऽप्यस्यार्थो बोद्धव्यः। यथा च महाभारते। ७। ९८। १३।
"रुधिरस्य परीवाहान् पूरयित्वा सरांसि च ॥"
परित उह्यते इति।) राजयोग्यवस्तु। इति मेदिनी। हे, ३३ ॥

परीष्टिः, स्त्री, (परि+इष्+"परे र्वा।" ३। ३। १०७। इत्यस्य वार्त्तिं इति पक्षे क्तिन्।) अन्वेषणा। इत्यमरः। २। ७। ३२ ॥ परिचर्य्या। प्राकाम्यम्। इति मेदिनी। टे, ४९ ॥

परीसारः, पुं, (परिसरणम्। परि+सृ+घञ्। "उपसर्गस्य घञीति।" ६। ३। १२२। इति दीर्घः।) परिसर्य्या। सर्व्वतोगमनम्। इत्यमरः। ३। २। २१ ॥

परीहारः, पुं, (परिहरणम्। परि+हृञ् हरणे+घञ्। "उपसर्गस्य घञीति।" ६। ३। १२२। इति दीर्घः।) अवज्ञा। इति शब्दरत्नावली ॥

परीहासः, पुं, (परि+हस+घञ्। उपसर्गस्य दीर्घः।) परीहसनम्। (यथा, मार्कण्डेये।३४।८४।
"परीवादं न कुर्व्वीत परीहासञ्च पुत्रक! ॥")
तत्पर्य्यायः। द्रवः २ केलिः ३ क्रीडा ४ लीला ५ नर्म्म ६। इत्यमरः। १। ७। ३२ ॥ परिहासः ७ केलिमुखम् ८ देवनम् ९। इति त्रिकाण्डशेषः ॥

परुः, पुं, (पिपर्त्तीति। पॄ लि पूर्त्तौ+बाहुलकात् उः।) समुद्रः। स्वर्गलोकः। ग्रन्थिः। पर्व्वतः। इति संक्षिप्तसारोणादिवृत्तिः ॥

परुः, [स्] क्ली, (पॄ+"अर्त्तिपॄवपियजितनीति।" उणां। २। ११८। इति उस्।) ग्रन्थिः। इत्यमरः। २। ४। १६२ ॥ (यथा, वाजसनेयसंहितायाम्।१३।२०।
"काण्डात् काण्डात् प्ररोहन्ति परुषः (सः) [परुषस्परि ॥"])

परुत्, अ, (पूर्व्वस्मिन् वत्सरे इति। "सद्यः परुदिति।" ५। ३। २२। इति पूर्व्वस्य परभावः उत् च।) गतवत्सरः। इत्यमरः। २।४।२० ॥

परुत्नः, त्रि, (परुत् गतवत्सरे भवः। परुत्+"चिरपरुत्परारिभ्यस्त्नो वक्तव्यः।" ४। ३। २३। इत्यस्य वार्त्तिं इति त्नः।) इति व्याकरणम् ॥

परुद्वारः, पुं, (परुः समुद्रः पर्व्वतो वा द्वारमिव यस्य।) घोटकः। इति शब्दमाला ॥

परुषं, क्ली, (पिपर्त्ति अलं बुद्धिं करोतीति। पॄ+"पॄनहिकलिभ्य उषच्।" उणां। ४। ७५। इति उषच्।) निष्ठुरवाक्यम्। इत्यमरः। १। ६। १९॥ (परेषां देशजातिकुलविद्याशिल्परूपवृत्ताचारपरिच्छदशरीरकर्म्मजीविनां प्रत्यक्षदोषवचनं परुषमिति वदन्ति ॥ यथा, हेः रामायणे। १। १ ८२।
"तामुवाच ततो रामः परुषं जनसंसदि।
अन्दष्यमाणा सा सीता विवेश ज्वलनं सती ॥")
नीलझिण्टी। इति शब्दचन्द्रिका ॥ परुषफलम्। इति भावप्रकाशः ॥ (नीलझिण्टीशब्देऽस्य गुणादयो ज्ञातव्याः ॥)

परुषं, त्रि, (पिपर्त्तीति। पॄ लि पूर्त्तौ+"पॄनहिकलिभ्य उषच्।" उणां। ४। ७५। इति उषच्।) कर्व्वूरः। (यथा, बृहत्संहितायाम्। ३। ३९।
"असितविचित्रनीलपरुषो जनघातकरः।
खगम्टगभैरवखररुतैश्च निशाद्युमुखे ॥")
रूक्षः। (यथा, हेः रामायणे। १। ५८।१०।
"अथ रात्र्यां व्यतीतायां राजा चण्डालतां गतः।
नीलवस्त्रधरो नीलः परुषो ध्वस्तमूर्द्धजः ॥")
निष्ठुरोक्तिः। इति मेदिनी। षे,४० ॥ (मलिनः। यथा, आर्य्यासप्तशत्याम्। ४१९।
"भस्मपरुषेऽपि गिरिशे स्नेहमयी त्वमुचितेन सुभगासि।"
"भस्ममलिनेऽपि गिरिशे।" इति तट्टीका ॥)

परुषोक्तिकः, त्रि, (परुषमेव उक्तिर्यस्य। ततः स्वार्थे कन् कप् वा।) निष्ठुरवक्ता। इति जटाधरः ॥

परूषं, क्ली, (पॄ+ऊषन्।) फलवृक्षभेदः। परुषफल इति वङ्गभाषा। फरूसा इति फलूहे इति च हिन्दीभाषा। तत्पर्य्यायः। परूषकम् २ नागदलोपमम् ३। इति रत्नमाला ॥ परुषम् ४ अल्पास्थि ५ परापरम् ६। इति भावप्रकाशः ॥ नीलचर्म्म ७ गिरिपीलु ८ परावतम् ९ नीलमण्डलम् १० परुः ११। अस्य गुणाः। अम्लत्वम्। कटुत्वम्। कफार्त्तिवातनाशित्वञ्च। तदामफलगुणः। पित्तदत्वम् उष्णत्वञ्च। तत्पक्वफलगुणाः। मधुरत्वम्। रुचिप्रदत्वम्। पित्तशोफहरत्वम्। तर्पणत्वञ्च। इति राजनिर्घण्टः ॥
"परूषकं कषायाम्लमामं पित्तकरं लघु।
तत् पक्वं मधुरं पाके शीतं विष्टम्भि बृंहणम् ॥
हृद्यं क्षट्पित्तदाहास्रज्वरक्षयसमीरहृत् ॥"
इति भावप्रकाशः ॥
("परूषकैटर्य्यकपीलुकानां
पियालसिंही करमर्द्दकानाम्।
फलानि चैतानि निहन्ति पित्तं
हन्याच्च सर्व्वातुरसन्धिवातम् ॥"
इति हारीते प्रथमस्थाने दशमेऽध्याये ॥)

परूषकं, क्ली, (परूष+स्वार्थे कन्।) परूषम्। इति राजनिर्घण्टः ॥ (अस्य पर्य्याया यथा,—
"परूषकं परूषं स्यात् क्वचिन्नागदलोपमम्।"
इति वैद्यकरत्नमालायाम् ॥
यथास्य गुणाः चरके सूत्रस्थाने २७ अध्याये।
"अम्लं परूषकं द्राक्षा वदर्य्यारुकाणि च।
पित्तश्लेष्मप्रकोपीनि कर्कन्धुलकुचान्यपि ॥"
"अत्यम्लमीषन्मधुरं कषायानुरसं लघु।
वातघ्नं पित्तजननमामं विद्यात् परूषकम् ॥
तदेव पक्वं मधुरं वातपित्तनिवर्हणम्।
विपाके मधुरं शीतं रक्तपित्तप्रसादनम् ॥"
इति सुश्रुते सूत्रस्थाने। ४६ अध्याये ॥)

परेतः, त्रि, (परं लोकमितः।) मृतः। इत्यमरः। २। ८। ११७ ॥ (यथा, कुमारे।५।६८।
"अलक्तकाङ्कानि पदानि पादयो-
र्विकीर्णकेशासु परेतभूमिषु ॥")
भूतान्तरे पुं,। इति मेदिनी। ते, १२६ ॥

परेतराट्, [ज्] पुं, (परेतेषु मृतेषु राजते इति। राजृ ञ् ण दीप्तौ+"सत्सूद्विषेति।"३।२।६१। इति क्विप्। यद्वा, परेतानां प्रेतानां राट्।) प्रेतराजः। यमः। इत्यमरः। १। १। ६१ ॥

परेद्यवि, अ, परस्मिन्नहनि। ("सद्यःपरुदिति।" ५। ३। २२। इति निपातनात् साधुः।) परदिनम्। इति मुग्धबोधव्याकरणम् ॥ यथा,—
"परेद्यव्यद्यपूर्व्वेद्युरन्येद्युश्चापि चिन्तयन्।
वृद्धिक्षयौ मुनीन्द्राणां प्रियम्भावुकतामगात् ॥"
इति भट्टिः। ४। १३ ॥

परेद्युः, [स्] अ, (पर+एद्युस्।) परदिनम्। इति मुग्धबोधव्याकरणम् ॥

परेपं, त्रि, परा गता आपो यत्र। ("द्व्यन्तरुपसर्गेभ्योऽप ईत्।" ६। ३। ९७। इत्यस्य वार्त्तिं "अवर्णान्ताद्वा।" इति ईत्। परापम्।) इति सिद्धान्तकौमुदी ॥

परेष्टुका, स्त्री, (परैरिष्यते इति। इष+बाहुलकात् तु। स्वार्थे कन्। स्त्रियां टाप्।) बहुसूतिः। बहुप्रसूता गौः। इत्यमरः। २। ९। ७० ॥